हरत्यन्नेति । यदाह प्रवराध्यायः ।"यद्येषां स्यात्तु भार्य्यासु अपत्यं न स्यात् तदा रिक्थं हरेयुरिति" । तथा नारदः "द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक् । रिक्थादर्द्धं समादद्युर्बीजिक्षेत्रिकयोस्तथा" । वीजिक्षेत्रिकपदयोर्जनकप्रतिग्रहीत्रुभयोपलक्षकत्वं प्रागेवाभिहितम् ।

अथान्धपङ्गुप्रभृतिपुत्राणां धनानधिकारितया तदौरसक्षेत्रजयोरेव पितामहधनभागित्वश्रुतेर्न तद्गृहीतदत्तकपुत्रादेः पितामहधनाधिकारः । किन्तु भरणमात्रम् अन्धादिभार्य्याणां भरणविधानेन तद्भरणस्य दण्डापूपायितत्वात् । तथा हि, "अन्धपङ्ग्वादीननधिकारिपुत्रानभिधायाह "औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः । अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः । सुताश्चैषां प्रभर्त्तव्या यावद्वै भर्तृसात् कृता."याज्ञ० । एवं ग्रहणानन्तरमुत्पन्नौरसेन सह दत्तकस्य विभागदर्शनात् सत्यौरसे गृहीतस्यापि नांशभागित्वमिति । तथा विधानं विना परिगृहीतस्यापि नांशभागित्वमित्याह "तस्मिन् जाते सुते दत्ते न कृते च विधानके । तत् स्वं तस्यैव वित्तस्य यः स्वामी पितुरङ्गमा" । तथा मनुः "अविधाय विधानं यः परिगृह्णाति पुत्रकम् । विवाहविधिभाजं तं न कुर्य्यात् धनभाजनम्" इति । अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह "यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित् । अंशभाजं न तं कुर्य्यात् शौनकस्य मतं हि तत्" ।

दत्तकमीमांसोक्तो विशेषो दिङ्मात्रमत्रोदाह्रियते । "पुत्त्रानुमत्या पुत्त्रवतोऽपि पुत्त्रग्रहणेऽधिकारः "यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम् । पुरस्तात् सर्वे कुर्म्महे त्वामन्वञ्चो वयं स्म हीति" श्रौतलिङ्गात्" ।

"अपुत्रेणेति पुंस्त्वं विवक्षितं स्त्रिया होमप्रतिग्रहमन्त्रानधिकारेण तद्ग्रहणानधिकारः इति वाचस्पतिमतं तद्दूषयित्वा ब्राह्मणादिद्वारा होममन्त्रपाठेन भर्त्रनुज्ञया तासामप्यधिकारः इति" व्यवस्थापितम् । "एकत्वविवक्षया द्वाभ्यां त्रिभिर्वा एकः पुत्रो न ग्रहीतुं शक्यते द्व्यामुष्यायणविधिश्च जनकपरिग्रहीतृद्वयविषयकः न प्रतिग्रहीतृद्वयविषयक इत्यविरोधः" इति । अत्र चन्द्रिकामतात् वैलक्षण्यम् । सोदरभ्रातृपुत्रस्य पुत्रीकरणे बहूनामपि मिलितानां युगपदेवाधिकारः । "तदयं निर्गलितोऽर्थः । समानगोत्रः सपिण्डो मुख्यः तदभावेऽसमानगोत्रः सपिण्डः । यद्यप्यसमानगोत्रः सपिण्डः समानगोत्रोऽसपिण्डश्चेत्युभावपि तुल्यकक्षौ एकैकविशेषणराहित्यादुभयोस्तथापि गोत्रप्रवर्त्तकपुरुषात् सापिण्ड्यप्रवर्त्तकपुरुषस्य सन्निहितत्वेनाभ्यर्हितत्वं तेन चासमानगोत्रोऽपि सपिण्ड एव ग्राह्यो मातामहकुलीनः सर्वथा सपिण्डाभावेऽसपिण्डस्तत्रापि समानोदकः आ चतुर्द्दशात्समानगोत्रः प्रत्यासन्नः । तस्याभावे असमानोदकः सगोत्र ऐकविंशात् । तस्याप्यभावे असमानगोत्रोऽसपिण्डश्चेति तदाह शाकलः "सपिण्डापत्यकञ्चैव सगोत्रजमथापि वा । अपुत्त्रको द्विजो यस्मात् पुत्त्रत्वे परिकल्पयेत् । समानगोत्रजाभावे पालयेदन्यगोत्रजम्" इति । सगोत्र इत्यनेन सोदकसगोत्रौ गृह्येते । अत्र च पूर्वपूर्वस्य प्रत्यासत्त्यतिशयेन निर्द्देश इति तदेवाह वशिष्ठोऽपि "अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्" इति । अस्यार्थः अदूरश्चासौ बान्धवश्चेत्यदूरबान्धवः सन्निहितः सपिण्ड इत्यर्थः । सान्निध्यञ्च द्विधा सगोत्रतया स्वल्पपुरुषान्तरेण च भवति । तत्र सगोत्रः स्वल्पपुरुषान्तरः सपिण्डो मुख्यस्तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डः । तदभावे असमानगोत्रः सपिण्डस्तस्याप्यभावे बन्धुसन्निकृष्टः सपिण्डः बन्धूनां सपिण्डानां सन्निकृष्टः सपिण्डः स्वस्यासपिण्डः सोदक इत्यर्थः पर्य्यवस्यति । तत्रापि सन्निकर्षो द्विविधः सगोत्रतया स्वल्पपुरुषान्तरेण च । स्वस्यासपिण्डोऽपि स्वसमानगोत्रः स्वल्पपुरुषान्तरः सपिण्डानां सपिण्डो मुख्यस्तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डसपिण्डः सोदक इति यावत् । सपिण्डसोदकासम्भवे समानगोत्र ऐकविंशात् ग्राह्यः । "तदभावेऽसमानगोत्रोऽसपिण्डोऽपि ग्राह्यः ।"तदभावेऽसपिण्ड वेति" शौनकीयात् "सन्देहे चोत्पन्ने दूरबान्धवं शूद्रमिव स्थापयेत्" इति वशिष्ठलिङ्गाच्च । "दूरे बान्धवा यस्यासौ दूरबान्धवः गोत्रसापिण्ड्याभ्यामसन्निहित इत्यर्थः । सन्देहोऽत्र कुलशीलादिविषयः । स चासपिण्डेऽसगोत्रे च भवतीति सोऽप्यनुज्ञायते" ।

सगोत्रसपिण्डेषु भ्रातृपुत्र एव पुत्त्रीकार्य्य इत्युक्तं यथा "तत्र सोदरभ्रातृपुत्र एव पुत्त्रीकार्य्य इत्याह मनुः । "भ्रातॄणामेकजातानामेकश्चेत् पुत्त्रवान् भवेत् । सर्व्वे ते तेन पुत्त्रेण पुत्त्रिणो मनुरब्रवीत्" इति । अत्र भ्रातॄणां प्रतिग्रहीतृत्वप्रतिपादनात् ग्राह्यत्वाभावोऽवगम्यते ।